International Journal of Sanskrit Research 2023; 9(4): 68-74

ISSN: 2394-7519
IJSR 2023; 9(4): 68-74
© 2023 IJSR
www.anantaajournal.com
Received: 15-05-2023
Accepted: 21-06-2023

**कोटाचारिः मामल्लिपल्लि**
फलितज्यौतिषशास्त्रे विद्यावारिधि (Ph.D)
शोधच्छात्रः राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः आंध्र प्रदेश, भारत

**Corresponding Author:**
**कोटाचारिः मामल्लिपल्लि**
फलितज्यौतिषशास्त्रे विद्यावारिधि (Ph.D)
शोधच्छात्रः राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिःआंध्र प्रदेश, भारत

# होरायाः महत्त्वम्

## कोटाचारिः मामल्लिपल्लि

**सारांश**
वेदाङ्गेषु ज्यौतिषशास्त्रं मूर्धन्यस्थानं भजते । वेदपुरुषस्य चक्षुषः स्थे विराजते इदं ज्यौतिषशास्त्रम् । अस्मिन् ज्यौतिषशास्त्रे स्कन्धत्रयं विद्यते – सिद्धान्तः, संहिता, होरा चेति । सिद्धान्तस्कन्धे गणितशास्त्रस्य खगोलशास्त्रस्य च विषयाः निरूपिताः सन्ति । संहितास्कन्धे वास्तु-दकार्गल-ग्रहचारादिविषयाः निरूपिताः सन्ति । होराशास्त्रे जातस्य शुभाशुभफलानि निरूपितानि । अस्य होराशास्त्रस्य महत्त्वमधिकृत्य अस्मिन् पत्रे मया निरूप्यते ।

कूटशब्द : सिद्धान्तः, संहिता, होरा चेति

## प्रस्तावना

### ज्यौतिषम्

ज्योतींषि नाम ग्रहनक्षत्राणि । तानि ग्रहनक्षत्राणि अधिकृत्य प्रवृत्तं शास्त्रं ज्यौतषशास्त्रम् । आङ्ग्लभाषायां ज्यौतषशास्त्रस्य Astrology इति नाम । ज्योतिषं, ज्यौतिषम् इति पदद्वयमपि साधु एव । जातकं, प्रश्नः, मुहूर्तः, गणितं, गोलः, निमित्तं चेति ज्यौतिषस्य षडङ्गानि भवन्ति । यथोक्तं प्रश्नमार्गे –

जातकगोलनिमित्तप्रश्नमुहूर्ताख्यगणितनामानि ।
अभिदधतीह षडङ्गान्याचार्या ज्योतिषे महाशास्त्रे ॥[1]

इति ।

सिद्धान्तः, संहिता, होरा चेति ज्यौतिषस्य स्कन्धत्रयं वर्तते । तत्र होरास्कन्धे जातक-प्रश्न-निमित्त-मुहूर्ताख्यानि चत्वारि अङ्गानि अन्तर्भवन्ति ।

### होराशास्त्रस्य महत्त्वम्

[1] प्रश्नमार्गः – प्रथमोऽध्यायः – श्लोकः ६

स्कन्धत्रयात्मकस्य ज्योतिश्शास्त्रस्य तृतीयः स्कन्धः एव होरास्कन्धः । होरास्कन्धे वैयक्तिकसम्बन्धेन फलादेशक्रमः विविच्यते । हिंसासंवरणाद्यर्थकात् हरधातोः पचाद्यचि टापि 'होरा' इति शब्दो निष्पद्यते । अथवा घञ् प्रत्यये सति टापि कृते 'हुर्यते' इति करणार्थकप्रयोगे होराशब्दः सिद्ध्यति ।

नरैः प्राग्जन्मकृतशुभाशुभकर्मणाम् अस्मिन् जन्मनि कानि फलानि अनुभोक्तव्यानि भवन्तीति ज्यौतिषस्य यस्मिन् स्कन्धे निरूप्यते सः स्कन्धः होरास्कन्धः इत्युच्यते । यथोक्तं लघुजातके –

यदुपचित्यमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम् ।
व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव ॥

इति ।

अहोरात्रपदस्य पूर्वापरवर्णयोः लोपात् होराशब्दस्य निष्पत्तिर्भवति । यथोक्तं कल्याणवर्मणा सारावल्याम् –

आद्यन्तवर्णलोपाद्धोराशास्त्रं भवत्यहोरात्रम् ।
तत्प्रतिबद्धश्चायं ग्रहभगणश्चिन्त्यते यस्मात् ॥[2]

इति ।

बृहज्जातकेऽपि आचार्येण वराहमिहिरेण उक्तम् –

होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात् ।
कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति ॥[3]

इति ।

पाराशरहोराशास्त्रेऽपि तदेव अस्ति –

"अहोरात्रस्य पूर्वान्त्यलोपाद्धोराऽवशिष्यते"

इति ।

भट्टोत्पलस्तु अस्य उपपत्तिम् इत्थं प्रदर्शयति - "मेषादयो द्वादशलग्नराशयोऽहोरात्रान्तर्भूताः लग्नस्य च कालवशाज्ज्ञानम् । लग्नवशाच्छुभाशुभज्ञानम् । अतोऽहोरात्राश्रयत्वात् तत एव होराशब्दो व्युत्पाद्यते" इति । अर्थात् मेषादयो द्वादशलग्नराशयः अहोरात्रे अन्तर्भवन्ति । कालवशात् लग्नस्य ज्ञानं, लग्नवशाच्च शुभाशुभफलज्ञानम् अहोरात्राश्रयं भवति । अतः अहोरात्रशब्दादेव होराशब्दस्य निष्पत्तिरभूदिति अस्य अभिप्रायः । भट्टोत्पल एतदेव आचार्यस्याप्यभिप्रेतम् । यतः परमतमप्रतिषिद्धमनुपतमिति । परन्तु लोकमणिदाहलः एतत् तन्मतं नास्तीति कथयति, 'एके' पदसूचितत्वात् । सामान्यतः एकापरान्यप्रभृतिशब्दैरनभिमतमेव प्रकाशितं दृश्यते शास्त्रान्तरेषु । यथा हि भगवान् पाणिनिः, "यजुष्येकेषाम्"[4] इति सूत्रे । केचन विद्वांसः होराशब्दम् फलितज्यौतिषस्य अर्थे रूढं मन्यन्ते ।

होराशास्त्रे जातस्य शुभाशुभफलानि निरूपितानि सन्ति । पूर्वस्मिन् जन्मनि अस्माभिः कृतानां शुभानाम् अशुभानां च कर्मणाम् अस्मिन् जन्मनि किं फलम् अस्माभिः अनुभोक्तव्यानि भवन्तीति होराशास्त्रं बोधयति ।

विधात्रा लिखितां ललाटरेखां होरानिर्मलचक्षुषा दैवज्ञः पठति । यथोक्तं सारावल्यां कल्याणवर्मणा –

विधात्रा लिखिता याऽसौ ललाटेऽक्षरमालिका ।
दैवज्ञस्तां पठेद्व्यक्तं होरानिर्मलचक्षुषा ॥[5]

इति ।

शुभाशुभकर्मफलज्ञानं येन शास्त्रेण भवति तदेव होराशास्त्रमिति चतुराः विद्वांसः कथयन्ति । लग्नस्यापि होरा इति संज्ञा अस्ति । राश्यर्धमपि होरा इति उच्यते । यथोक्तं सारावल्यां कल्याणवर्मणा–

कर्मफललाभहेतुं चतुराः संवर्णयन्त्यन्ये ।
होरेति शास्त्रसंज्ञा लग्नस्य तथार्धराशेश्च ॥[6]

इति ।

एवञ्च लोके यत् जातकम् इति कथ्यते तत् होरासंज्ञं भवति । अथवा दैवविमर्शनपर्यायः होरा भवति । यथोक्तम् –

जातकमिति कथ्यते यल्लोके तदिह कीर्त्यते होरा ।
अथवा दैवविमर्शनपर्यायः खल्वयं शब्दः ॥[7]

इति ।

होराशास्त्रम् अर्थार्जने सहायं करोति । विपत्तिरूपसमुद्रस्य तरणार्थं पोतरूपेण भवति । यात्रासमये मन्त्री भवति । यथोक्तम् –

अर्थार्जने सहायः पुरुषाणामापदर्णवे पोतः ।
यात्रासमये मन्त्री जातकमपहाय नास्त्यपरः ॥[8]

---

[2] सारावली – द्वितीयोऽध्यायः – श्लोकः २

[3] बृहज्जातकम् – राशिप्रभेदाध्यायः – श्लोकः ३

[4] अष्टाध्यायी - ८-३-१०४

[5] सारावली – द्वितीयोऽध्यायः – श्लोकः १

[6] सारावली – द्वितीयोऽध्यायः – श्लोकः ३

[7] सारावली – द्वितीयोऽध्यायः – श्लोकः ४

इति ।

**होराशास्त्रे अधोनिर्दिष्टाः विषयाः वर्णिताः सन्ति**

- **शुभाशुभोगाः** – होराशास्त्रे जन्मकुण्डल्याः आधारेण शुभाशुभयोगाः निरूपिताः सन्ति । नाभसयोग-सङ्ख्यायोग-गजकेसरीयोग-राजयोग-महाराजयोग-चक्रवर्तियोग-आश्रययोग-चान्द्रयोगादयो बहवः योगाः होराशास्त्रे निरूपिताः सन्ति । तान् योगान् दृष्ट्वा दैवज्ञः जातकस्य शुभाशुभत्वं वक्तुं शक्नोति ।
- **वृत्तिचिन्तनम्** – जातकः कया वृत्त्या जीवति ? कया वृत्त्या धनार्जनं करोति ? इति होराशास्त्रानुसारेण वक्तुं शक्यते । दशभावात् वृत्तिचिन्तनं भवति । यतो हि दशमभावः कर्मभावः इत्युच्यते ।
- **भावफलानि** – लग्नभावः, द्वितीयभावः, तृतीयभावः, चतुर्थभावः, पञ्चमभावः, षष्ठभावः, सप्तमभावः, अष्टमभावः, नवमभावः, दशमभावः, एकादशभावः, द्वादशभावः चेति द्वादश भावाः सन्ति । तेषु भावेषु शुभाशुभग्रहाणां स्थिति-दृष्ट्यादिसम्बन्धवशात् शुभाशुभफलानि होराशास्त्रे प्रतिपादितानि सन्ति ।
- **राशिफलानि** – मेषः, वृषभः, मिथुनं, कर्काटकः, सिंहः, कन्या, तुला, वृश्चिकः, धनुः, मकरः, कुम्भः, मीनः चेति द्वादश राशयः भवन्ति । तेषु राशिषु रव्यादिग्रहाणां सम्बन्धवशात् शुभाशुभफलानि होराशास्त्रे निरूपितानि सन्ति ।
- एवञ्च निषेकविचारः, जन्मविधिः, आयुर्दायः, दशाफलविचारः, द्रेष्काणफलविचारः, नष्टजातकम् – इत्यादयो नैके विचाराः होराशास्त्रे प्रतिपादिताः सन्ति ।

मेदिनीकोशे होराशब्दस्य लग्नं, राश्यर्धं, रेखा, शास्त्रम् - एते अर्थास्सन्ति । होराशब्दः शास्त्रार्थे सर्वत्र प्रयुक्तः ।
लग्नार्थे होराशब्दः कथं प्रयुक्तः इति पश्यामः । यथोक्तं सारावल्याम् -

संज्ञा वेश्माष्टमयोश्चतुरस्रं वै तपश्च नवमस्य ।
होरास्तदशजलानां चतुष्टयं कण्टकं केन्द्रम् ॥

इति । श्लोकेऽस्मिन् द्वादशभावानां संज्ञावर्णनप्रसङ्गे भावानां संज्ञान्तरं प्रददन् कल्याणवर्मा अयं श्लोकं कथयति । अस्यायमर्थः । चतुर्थ-अष्टमभावयोः चतुरस्रसंज्ञा । नवमभावस्य 'तप' इति संज्ञा । लग्न-सप्तम-दशम-चतुर्थभावानां चतुष्टयं, कण्टकं, केन्द्रञ्चेति संज्ञात्रयम् । अत्र होराशब्दः लग्नभावस्य अर्थे प्रयुक्तोऽस्ति । होरारत्ने च -

षष्ठं तृतीयं दशमञ्च राशिमेकादशञ्चोपचयर्क्षमाहुः ।
होरागृहस्थानशशाङ्केभ्यः शेषाणि चैभ्योऽपचदात्मकानि ॥

इति । बृहज्जातकेऽपि -

होरादयस्तनुकुटुम्बसहोत्थबन्धुपुत्रारिपत्निमरणानि शुभास्पदायाः।
रिःफाख्यमित्युपचयान्यरिकर्मलाभदुश्चिक्यसंज्ञितगृहाणि न नित्यमेके ॥

इत्युक्तम् । एषु श्लोकेषु होराशब्दः लग्नार्थे एव प्रयुक्तः । राश्यर्धम् (राशिदलम्) इत्यर्थेऽपि होराशब्दः प्रयुक्तो दृश्यते । यथोक्तं भावकुतूहले -

होरा राशिदलं समे प्रथमतश्चन्द्रस्य भानो रतो ।
व्यत्यासा................................................ ॥

इति । राशिदलं नाम राश्यर्धमित्यर्थः । दलशब्दस्य अर्धमित्यर्थः । बृहज्जातकेऽपि वराहमिहिरेण राश्यर्धम् इत्यर्थे होराशब्दः प्रयुक्तः दृश्यते - "होरेति लग्नं भवनस्य चार्धम्" इति । अत्र लग्नार्थे राश्यर्धार्थे च होराशब्दः कथितः । ज्योतिस्तत्त्वेऽप्युक्तम् -

विषमर्क्षेषु प्रथमहोराः स्युश्चण्डरोचिषः ।
द्वितीयाः शशिनो युक्षु व्यत्ययाद् गणयेत् सदा ॥

इति । तथा सार्धदण्डद्वयात्मककालेऽर्थेऽपि होराशब्दः प्रयुक्तः । दण्डशब्दस्य घटी इत्यर्थः । अतः १ होरा = २१/२ घटिकाः = ६० निमेषाः । उक्तञ्च आग्नेये गणभेदाध्याये –

चतुर्विंशतिवेलाभिरहोरात्रं प्रचक्ष्यते ।
पश्चिमादर्धरात्रादिहोराणां विद्यते क्रमः ॥

इति । लघुजातके होराशब्दस्य प्रयोगः एवं भवति -

गृहहोराद्रेष्कणा नवभागो द्वादशांशकस्त्रिंशः ।
वर्गः प्रत्येतव्यो ग्रहस्य यो यस्य निर्दिष्टः ॥

[8] सारावली – द्वितीयोऽध्यायः – श्लोकः ५

इति । षड्वर्गेषु अन्यतमा होरा । सैव राश्यर्धम् । राशिचक्रे २४ होराः । अहोरात्रेऽपि २४ होराः ।
यतः राशिचक्रे ३६० अंशाः ।
३६० अंशाः = ६० घटिकाः ।
अतः १ घटिका = ६°
एवं १ होरा = २१/२ घटिकाः = १५ अंशाः इति सिद्ध्यति ।

अतः राशिचक्रे ३६०°/१५ = २४ होराः ।

अहोरात्रेऽपि $\frac{\text{६० घटिकाः}}{\text{२}\frac{\text{१}}{\text{२}}}$ = २४ होराः ।

इति सिद्ध्यति ।
किन्तु उपरि लिखितानाम् अर्थानाम् अपेक्षया शास्त्रार्थे एव होराशब्दः सर्वत्र प्रसिद्धः । शास्त्रार्थे एव पूर्वाचार्यैः अधिकतया होराशब्दस्य प्रयोगः कृतश्च ।
एवं यस्मिन् शास्त्रे वैयक्तिकसम्बन्धेन फलादेशः क्रियते तदेव होराशास्त्रमित्युच्यते । अथवा यत्र ग्रहस्थितितिथिनक्षत्रादिद्वारा मनुष्यस्य सुखदुःखाद्यवाप्तिः निर्णीयते तदेव होराशास्त्रं भवति । वराहमिहिरस्तु बृहत्संहितायां होरा अङ्गविनिश्चयः इति निरूपितवान्। मनुष्यस्य प्राग्जन्मोपार्जितकर्मणां सदसत्फलकथनमेव होराशास्त्रस्य विषयो भवति ।
यथा वयं दीपस्य साहाय्येन तमसि विद्यमानानि द्रव्याणि द्रष्टुं शक्नुमः तथैव अस्माभिः प्राग्जन्मनि कृतानां शुभपापकर्मणाम् अस्मिन् जन्मनि का फलानुभूतिर्भविष्यतीति अस्य होराशास्त्रस्य साहाय्येन वयं ज्ञातुं शक्नुमः इति । अस्माभिः कृतानां शुभाशुभकर्मणां फलानि तु प्राधान्येन द्विविधानि - “दृढादृढभेदेन” । तानि पुनस्त्रिविधानि - “मनोवाक्कर्मभेदैः” । एवमाहत्य शुभाशुभकर्मफलानां तु षट् भेदाः स्युः ।
तदेवोक्तं प्रश्नमार्गकारेण-

दृढादृढक्रियाप्तत्त्वाच्छुभाशुभफलं द्विधा ।
मनोवाक्कर्मजं तच्च त्रिविधं तद्विदोच्यते ॥

इति । शुभफलानाम् अशुभफलानां च एतेषां षण्णामपि भेदानां विषये होराशास्त्रे विस्तरेण चर्च्यते । तत्र दृढकर्मोपार्जितस्य दशाफलं पाकक्रमेण व्यनक्ति । तत्र अशुभं दशाफलं ज्ञात्वा यात्रादेः परिहारः कर्तव्यः । तथा अदृढकर्मोपार्जितस्य फलव्यक्तिः अष्टकवर्गेण भवति । तच्चाशुभं ज्ञात्वा शान्तिः कार्या । यथोक्तं यवनाचार्यैः -

यद्यद्विधानं नियतं प्रजानां ग्रहर्क्षयोगप्रभवं प्रसूती ।
भाग्यानि तानीत्यभिशब्दयन्ति वार्तानियोगेति दशा नराणाम् ॥

इति ।
यदि दृढकर्मोपार्जितम् अशुभं तदा तस्य परिहारं कुर्यात् यदा तु अदृढकर्मार्जितम् अशुभं तदा पौरुषेण तद्धन्यादिति फलादेशस्य प्रयोजनम् । यथाऽऽह व्यासः -

“विहन्याद् दुर्बलं देवं पुरुषेन विपश्चिता”

इति ।
ग्रहा हि पूर्वकर्मार्जितं शुभाशुभफलं व्यञ्जयन्तीत्येतस्य कथनस्य अयमेव आशयः यत् अस्य यादृक् सञ्चितं कर्म स तदनुकूले समये जन्म लभत इति । ग्रहनक्षत्राण्यपि तथैव यथायोगमनुकूलाः प्रतिकूला वा भूत्वा शुभमशुभं वा प्रकटयन्ति च । शुभाशुभज्ञानानन्तरम् नरः शान्त्यादिविविधोपायेन शुभं परिहर्तुं प्रभवेदिति फलादेशस्य महत्त्वम् । यस्य जन्मनि यस्य यस्य ग्रहादेः प्राबल्यं स तत्समानप्रकृतिक एव भवतीति भेलापकादावस्य सुमहत्प्रयोजनम् । अत एवोक्तम् - “त्रिस्कन्धज्ञो नावसीदतीति” ।
होरास्कन्धः ज्यौतिषस्य अत्युपयोगिकः स्कन्धः भवति । ज्योतिश्शास्त्रस्य व्यवहारोपयोगित्वे ग्रन्थस्यास्य महद्योगदानं वर्तते । होरास्कन्धे जन्मकुण्डल्याः द्वादशभावाः तत्फलानि च प्राधान्येन चर्च्यन्ते । मानवस्य जीवने जायमानानां सुख-दुःख-इष्ट-अनिष्ट-उन्नति-अवनति-भाग्योदयादिनां विवेचनम् अस्मिन् स्कन्धे क्रियते । होराशास्त्रे ग्रहचारवशात् सन्तानादिसम्भवस्य आयुर्दायसम्भवस्य राज्यादिसम्भवस्य च जन्मकुण्डल्यादिना निर्णयं कर्तुं शक्नुमः । प्राप्तव्यफलस्य प्रतिबन्धकं दुरितम् अपहर्तुम् इदं होराशास्त्रम् अत्युपयोगी भवति । शुभाशुभफलं दृष्ट्वा तादृशफलप्रदस्य शुभाशुभकर्मणः अनुमानमपि अनेन शास्त्रेण कर्तुं शक्यते । जातकस्य भाग्यं कदा फलीभविष्यति, पूर्णतः अंशतो वा कदा फलप्राप्तिर्भवतीति होराशास्त्रेणैव ज्ञातुं शक्यते । होराशास्त्रमिदं दिनरात्रिपक्षमासादिरूपाणां कालानां फलज्ञापकं भवति । जन्मकुण्डलीस्थानं लग्नादिषु द्वादशभावेषु स्थितानां ग्रहाणां दशान्तर्दशादिविवेचनं होराशास्त्रे क्रियते । पूर्वोपार्जितसदसत्कर्मपरिपाकस्य ज्ञानं तावत्पर्यन्तं न भवति यावत्पर्यन्तं तस्य फलं नापतति । होराशास्त्रं तस्य फलप्रदस्य कालस्य ज्ञानं कारयति । अतो होराशास्त्रस्य आवश्यकता अतीव विद्यते । शुभफलसूचकदशायाः पाककाले विधीयमाना यात्रा विनायासं फलदायिका भवति । अशुभफलसूचकदशायाः

परिपाककाले विधीयमाना यात्रा हानिकारिणी भवतीति होराशास्त्रं बोधयति । तस्मात् अस्माभिः कस्यां दशायां किं कर्म करणीयम्? किं कर्म न करणीयम् ? अशुभदशायाम् अकरणीयानि कार्याणि कृतानि चेत् कानि दुष्परिणामानि भविष्यन्तीति अनेन होराशास्त्रेण स्पष्टतया ज्ञायते । इदं होराशास्त्रं भविष्यजीवने यानि शुभाशुभानि विद्यमानानि सम्भवन्तीति ज्ञापयति । अतः भविष्यजीवने जायमानानाम् अशुभविद्यमानानां कृते जागरूकतां वोढुं तथा यथा भविष्ये अशुभविद्यमानानि न घटिष्यन्ति, यदि घटिष्यन्त्येव तर्हि तेषां विद्यमानानाम् अशुभत्वप्रमाणं यथा न्यूनीभविष्यति तथा (नाम यदि मरणमेव सम्भविष्यति तर्हि वाहनापघातेनैव अस्य अशुभविद्यमानस्य निवृत्तिर्भवति तथा) अस्माभिः कृतानां पापकर्मणां प्रायश्चित्तादिकानि कर्तुम् अनुकूलो भवति । अनेनैव होराशास्त्रस्य महत्त्वं कियद्वर्तते इति ज्ञायते ।

यद्यपि "ललाटलिखिता रेखा परिमार्ष्टुं न शक्यते" तथापि ललाटे किं लिखितमस्तीति पठितुं शक्यते । किन्तु सर्वैः न शक्यते । केचन सिद्धपुरुषैरेव शक्यते । तादृशेषु सिद्धपुरुषेषु दैवज्ञोऽपि भवति । स च दैवज्ञः होराशास्त्राख्यनिर्मलचक्षुषा ललाटे विधात्रा(ब्रह्मणा) लिखिताम् अक्षरमालिकां पठेत् । गुणाकराख्यो दैवज्ञोऽपि स्वकीये होरामकरन्दग्रन्थे तथैव कथयति-

> वर्णावली या लिखिता विधात्रा ललाटपट्टे भुवि मानवानाम् ।
> होरादशानिर्मलया यथावत् तां दैवविद् वाचयतीति नान्यः ॥

इति ।

एवं जन्मकुण्डलीम् अधिकृत्य द्वादशभावानां शुभाशुभफलविवेचनमेव होराशास्त्रस्य मुख्यं विषयवस्तु । शुभाशुभफलविवेचनात् प्राक् द्वादशराशीनां स्वरूपवर्णनं, ग्रहाणां वर्णस्वरूपादिविचाराः, जन्मलग्ननिर्णयः, षड्वर्ग-षोडशवर्गादिनिरूपणं, दशान्तर्दशाविचारः, आयुर्दायविचारः -इत्यादिविचाराः प्रायेण सर्वेष्वपि होराग्रन्थेषु अवश्यं क्रियन्ते । ततः पश्चादेव होराग्रन्थेषु फलनिरूपणं कृतमस्ति ।

इदं होराशास्त्रं शुभस्य अशुभस्य अवश्यंभाविनो वा फलस्य अभिव्यञ्जनं करोति । ग्रहाः हि पूर्वस्मिन् जन्मनि अस्मत्कृतशुभपापकर्मणाम् अस्मिन् जन्मनि अस्माभिः अनुभोक्तव्यानि फलानि अभिव्यञ्जयन्ति । अतः ग्रहाः कर्मफलसूचकाः भवन्ति । नाम ग्रहाः केवलम् अस्माभिः कृतानां कर्मणां फलानां सूचकाः । भविष्ये एतानि फलानि भवद्भिः अनुभोक्तव्यानीति ते सूचयन्ति । ग्रहाः एव एतानि फलानि कुर्वन्तीति अन्यथापरिकल्पनं मास्तु । शकुनान्यपि एवमेव । ग्रहाः शकुनानि वा किमपि शुभं वा अशुभं वा फलं न कुर्वन्ति । फलानां बीजन्तु अस्मत्कृतकर्माण्येव इति अत्र अवगन्तव्यम् । जातकस्य यस्य यादृक् सञ्चितं कर्म भवति सः तदनुकूले काले जन्म लभते । ग्रहाः तथा नक्षत्राण्यपि तथैव यथायोगम् अनुकूलाः प्रतिकूलाः वा भूत्वा शुभाशुभफलानि प्रकटीकुर्वन्ति । शुभाशुभफलानां ज्ञानानन्तरं ग्रहशान्त्यादिभिः शास्त्रविहितैः विविधोपायैः सम्भाव्यस्य अशुभफलस्य परिहारः करणीयः । एतदर्थमेव फलादेशः क्रियते । अयं फलादेशः ज्यौतिषस्य विशिष्टः विषयोऽस्ति । जन्मकाले यस्य यस्य ग्रहादेः प्राबल्यं भवति सः तत्समानप्रकृतिको भवति । तदनुकूलमेव तस्य कर्मफलानि प्रस्फुटीभवन्ति ।

**होरास्कन्धस्य भेदाः**

होरास्कन्धस्य हि पञ्च भेदाः सन्ति – जातकं, ताजिकं, रमलं, प्रश्नः, स्वप्नश्चेति ।

- **जातकम्**–यस्मिन् शास्त्रे नरस्य जन्मकालिकग्रहाद्यवस्थितिमाधारीकृत्य भूत-वर्तमान-भाविशुभाशुभफलादेशः क्रियते तज्जातकशास्त्रम् ।
- **ताजिकम्**–यस्मिन् शास्त्रे गोचरमाधारीकृत्य फलादेशो क्रियते तत्ताजिकं शास्त्रम् । यस्मिन् शास्त्रे प्रस्तारद्वारा शुभाशुभफलानि कथ्यन्ते तद्रमलशास्त्रम् ।
- **प्रश्नशास्त्रम्** – यस्मिन् शास्त्रे प्रश्नलग्नमाधारीकृत्य फलादेशः क्रियते तत्प्रश्नशास्त्रम् ।
- **स्वप्नशास्त्रम्** – स्वप्नविवेचनेन शुभाशुभफलानि यस्मिन् शास्त्रे कथ्यन्ते तत् स्वप्नशास्त्रम् ।

तेषु अत्यन्तं प्रधानं भवति जातकशास्त्रम् । अस्मिन् जातकशास्त्रे जन्मकालिकग्रहाद्यवस्थितिम् आधारीकृत्य जनस्य भूतवर्तमानभाविशुभाशुभफलादेशः क्रियते । आकाशस्थानां पिण्डानां भूस्थैः जनैः साकं सम्बन्धनं सहसा न प्रतीतिमायाति । किन्तु तयोः अविच्छेदः सम्बन्धस्तु यथार्थतः अस्त्येव । एतदुक्तं भवति - "ग्रहैर्व्याप्तमिदं सर्वं त्रैलोक्यं सचराचरम्" इति । सूक्ष्मावलोकनेन एतत् स्पष्टमेव ज्ञायते यत् प्राकृतिको यस्य जन नक्षत्रतत्स्वामिराशितत्पतिलग्नतत्पतिमासतत्पतिवासरतिथितत्पतीत्यादिः तत्प्राकृतिक एव जनो भवतीति । यथा हि मेषराशौ जातो जनो जलाद् बिभेत्येव । यतः मेषराशेः मेषराशेः स्वामी कुजः, स च प्राकृतिको जलविमुखः । एवमेव सिंहस्य स्वामी सूर्यः । तद्राशौ जातो निश्चयमेव पित्तप्रकृतिकः अल्पवाचश्च भवति । यदि योगान्तरवशात् कस्मिंश्चिन्नपि सर्वाणि लक्षणानि घटेरन् तथापि स्वल्पमपि जन्मराशिप्रभावः देहे दृश्यत एव । एवमेव

नक्षत्रादीनामपि जानीयात् । तेन जातकफलादेशात्पूर्वं गगनस्थपिण्डानां ज्ञानम् अत्यावश्यकं भवति ।

फलप्रवचनार्थं जातकशास्त्रे राशेः षड्वर्ग-सप्तवर्ग-षोडशवर्गादयः उक्ताः । तेषु षड्वर्गः प्रसिद्धः । वराहमिहिराचार्यैः बृहज्जातके षड्वर्गस्यैव निरूपणं कृतम् । सप्तवर्गादयः उपेक्षणीयाः इति मिहिराचार्याणामभिप्रायः न । तेऽपि चिन्त्याः, तेषु षड्वर्गाः अवश्यं चिन्त्या एव इति धिया वराहमिहिराचार्याः बृहज्जातके षड्वर्गस्यैव निरूपणं कृतवन्तः । द्रेष्काणः, होरा, नवांशः, त्रिंशांशः, द्वादशांशः, क्षेत्रम् - एते एव षड्वर्गाः उच्यन्ते । सप्तांशसहिताः षड्वर्गाः सप्तवर्गो भवति । श्रीपतिना श्रीपतिपद्धतिनाम्ना प्रसिद्धायां जातककर्मपद्धतौ सप्तवर्गाः कथिताः।

इत्थं हि सुविस्तृतमिदं जातकशास्त्रं कदा विकसितमभूदिति इदमित्थया वक्तुं न शक्यते । तथापि तद्विषये इतिहासकारैः किञ्चित् विमर्शनं कृतम् ।

लग्नादिग्रहादिसदाधारेण फलादेशनप्रक्रिया कदा आरभ्य प्रवृत्तम् इति निश्चयेन वक्तुं न शक्यते । तथापि तत्तु नितान्तं प्राचीनमिति शास्त्रावलोकनेन ज्ञायते । वाजसेनीयसंहितायां नक्षत्रदर्शनस्य गणकस्य चोल्लेखो दृश्यते । एवमेव तैत्तिरीयब्राह्मणेऽपि । तत्र प्रज्ञानाय नक्षत्रदर्शमालभते गीताय गणकमित्याशयः सायणेन व्याख्यातः । एवमेव छान्दोग्योपनिषद्यपि नक्षत्रविद्यायाः उल्लेखो दृश्यते । तदा हि नक्षत्रविद्या प्रज्ञानाय मता । किन्तु तदा नक्षत्रविद्यया जीवनन्तु नितान्तमेव गर्हितं मतम् । मनुस्मृतौ नक्षत्रविद्याजीवी अपाङ्क्तेयो मतः । यथा –

हस्तिगोऽश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति ।
पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च ॥
कृषिजीवी श्लीपदी च सद्भिर्गर्हित एव च ॥
एतान् विगर्हिताचारानपाङ्क्तेयान् द्विजाधमान् ।
द्विजातिप्रवरो विद्वानुभयत्र विवर्जयेत् ॥
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥
इति ।

एतेन नैतदवधेयं यत् नक्षत्रविद्या एव तदा निन्दिता आसीदिति । वस्तुतस्तु तदा अपि नक्षत्रविद्या विशिष्टज्ञानविषयत्वेन मता । केवलं फलोपदेशेनैव जीवनं तु तदा निन्दितम् आसीत् । सत्यां हि नक्षत्रविद्यायामेव गर्हितायां नारदः स्वयमात्मानं नक्षत्रविद्याकुशलत्वेन सगौरवं नोपस्थापयेत् सनत्कुमारस्य पुरतः यथा छान्दोग्योपनिषदि नहि तथा सति याज्ञवल्क्यस्मृतौ, "पुरोहितं प्रकुर्वीत दैवज्ञमुदितोदितम्" इति कथितं स्यात् । तथा निन्दनं न केवलं नाक्षत्रिकस्यैवापितु सर्वेषामेव विज्ञानजीविनाम् । यथोक्तं वायुपुराणे -

सन्ति वेदविरोधेन केचिद्विज्ञानमानिनः ।
अयज्ञपतयो नाम ते भुञ्जन्ति यथा रजः ॥
इति ।

नक्षत्रज्ञाने एव गर्हिते सति पङ्क्तिपावनेषु षडङ्गविदामुल्लेखो न स्याद्यथा मनुस्मृतौ -

"त्रिणाचिकेतः पञ्चाग्निस्त्रिसौपर्णः षडङ्गविद्"
इति ।

वेदानां यथार्थमेव प्रवृत्तिस्ते च कालसाध्या इति कालज्ञानं कथम् निन्दितं स्यात् केवलं तदाश्रितजीविकैव गर्हितं तदा । यथा हि देवपूजनं प्रशस्तं किन्तु पूजकवृत्तिर्निन्दिता तथैवात्रापि ।

वैखानसस्मार्तसूत्रे जन्मकर्मसाङ्घातिकसामुदायिकवैनाशिकमानसनक्षत्राणाम् उल्लेखो दृश्यते । तेन हि नरः षण्णक्षत्रः । यथा व्याख्यातं योगयात्रायाम् । नरो यस्मिन्नक्षत्रे जायते तज्जन्मनक्षत्रमाद्यं ततो दशमं कर्मनक्षत्रम् । आद्यात् षोडशं साङ्घातिकम् । आद्यादष्टादशं समुदायनक्षत्रम् । त्रयोविंशतितमं वैनाशिकम् । आद्यात् पञ्चविंशतितमं मानसमिति । जन्मनक्षत्रे पुष्टे वा दुष्टप्रभाविते नरो रोगी दरिद्रश्च, कर्मनक्षत्रे पुष्टे कर्महानिः वस्तुनाशः, मानसे पुष्टे चित्तवैक्लव्यं, शुभे शुभयोगे वा सर्वेषामानुकूल्यमिति । राजा तु नवनक्षत्र-देशजातिराज्याभिषेकनक्षत्रयोगेन । विष्णुधर्मोत्तरेऽपि प्रथमखण्डस्य नवाशीतितमे अध्याये विषयोऽयं शान्तिविधिसहितो निर्दिष्टः । तत्रोक्तं यत् षट्स्वेव नक्षत्रेषु प्रभावितेषु नरस्य नाशो निश्चितः । एवमेव राज्याभिषेकनक्षत्रे प्रभाविते राज्ञो नाशो ध्रुवः । यदा हि कश्चिद् भरणीनक्षत्रे जायते तदा तत्तस्यादिनक्षत्रं, पूर्वाफल्गुनीकर्मनक्षत्रम्, अनुराधा हि साङ्घातिकनक्षत्रं, मूलम् हि समुदायनक्षत्रं, शतभिषा हि वैनाशिकनक्षत्रम्, उत्तराभाद्रा हि मनोनक्षत्रमिति ।

जातकशास्त्रे बहुभिः आचार्यैः बहवः ग्रन्थाः आरचिताः । तेषु ग्रन्थेषु आचार्यवराहमिहिरकृतं बृहज्जातकं प्रसिद्धम् । ग्रन्थोऽयं समस्तहोराशास्त्रस्य साररूपेण विद्यते । अस्य ग्रन्थस्य आमूलाग्रं पठनेन जातकशास्त्रे नैपुण्यं प्राप्तुं शक्यते । अन्येऽपि बहवः जातकग्रन्थाः प्रसिद्धाः अप्रसिद्धाश्च वर्तन्ते । केचन ग्रन्थाः उपलभ्यन्ते । बहवः नोपलभ्यन्ते । तेषु ग्रन्थेषु बृहत्पराशरहोराशास्त्रं, मयहोराशास्त्रं, यवनहोराशास्त्रं,

मणित्थहोराशास्त्रं, जैवहोराशास्त्रं, सत्यहोराशास्त्रं, विष्णुगुप्तहोराशास्त्रं, देवस्वामीहोराशास्त्रं, सिद्धसेनाहोराशास्त्रं, यवनेश्वरहोराशास्त्रं, बादरायणहोराशास्त्रं, जैमिनिसूत्रं, ध्रुवनाडीग्रन्थः - एते ग्रन्थाः बृहज्जातकपूर्ववर्तित्वेन स्मर्यन्ते । तेषु कांश्चन ग्रन्थकारान् वराहमिहिराचार्यः बृहज्जातके आयुर्दायाध्याये, "मययवनमणित्थशक्तिपूर्वैः......", "आयुर्दायं विष्णुगुप्तोऽपि चैवं देवस्वामी सिद्धसेनश्च चक्रे", "स्वमतेन किलाह जीवशर्मा", "सत्योपदेशो वरमत्र किन्तु" - एतेषु श्लोकेषु स्मरति च । सारावली-श्रीपतिजातकपद्धतिप्रभृतयो जातकग्रन्थाः बृहज्जातकस्य अनन्तरकालीनाः ग्रन्थाः मताः ।

**निष्कर्षः**

होराशास्त्रस्य आधारेण भविष्यचिन्तनं कर्तुं शक्यते । भविष्यविषये जनाः उत्सुकाः भवन्ति । भविष्ये किमपि अशुभं सम्भवति चेत् तस्य अशुभस्य न्यूनीकणं निवारणं वा होराशास्त्रस्य आधारेण कर्तुं शक्यते । एवं होराशास्त्रम् अत्यन्तं लोकोपयोगिकं शास्त्रं, होराशास्त्रमं शास्त्रम् अन्यत् नास्तीति निष्कर्षं दातुं शक्यते।

**सन्दर्भ सूची**


1. कल्याणवर्मा, सारावली, भारतीय बुक कारपोरेशन, दिल्ली
2. इटक्काट् नम्पूतिरिः, प्रश्नमार्गः – प्रथमो भागः, व्याख्या – सुरकान्तझा, चौखम्बा संस्कृत सीरीज आफिस – वाराणसी
3. इटक्काट् नम्पूतिरिः, प्रश्नमार्गः – द्वितीयो भागः, व्याख्या – सुरकान्तझा, चौखम्बा संस्कृत सीरीज आफिस – वाराणसी
4. वराहमिहिरः, (२०१३), बृहज्जातकम्, व्याख्या – केदारदत्तजोशी, मोतीलाल बनारसीदास – वाराणसी
5. वराहमिहिरः, (२०१४), बृहत्संहिता – प्रथमो भागः, व्याख्या – अच्युतानन्दझा, चौखम्बा विद्याभवनम् – वाराणसी
6. वराहमिहिरः, (२०१४), बृहत्संहिता – द्वितीयो भागः, व्याख्या – अच्युतानन्दझा, चौखम्बा विद्याभवनम् – वाराणसी
7. मन्त्रेश्वरः, (२०१५), फलदीपिका, व्याख्या – हरिशङ्करपाठकः, चौखम्बा सुरभारती प्रकाशनम् – वाराणसी
8. नारायणभट्टः, (२००७), चमत्कारचिन्तामणिः, व्याख्या – रमाशङ्करत्रिपाठी, चौखम्भा ओरियन्टालिया – दिल्ली
9. लोकमणिदाहालः, भारतीयज्योतिषशास्त्रस्येतिहासः (A History of Indian Astrology), चौखम्बा सुरभारती प्रकाशनम् – वाराणसी
10. सुधाकरद्विवेदी, (२००२), गणकतरङ्गिणी, सम्पादनम् – भारतभूषणमिश्रः, शिवसंस्कृतसंस्थानम् – वाराणसी
11. वैद्यनाथः, (२००९), जातकपारिजातः – प्रथमो भागः, व्याख्या – सत्येन्द्रमिश्रः, चौखम्बा संस्कृत सीरीज आफीस – वाराणसी
12. वैद्यनाथः, (२००९), जातकपारिजातः – द्वितीयो भागः, व्याख्या – सत्येन्द्रमिश्रः, चौखम्बा संस्कृत सीरीज आफीस – वाराणसी
13. रामदैवज्ञः, (२०१५), मुहूर्तचिन्तामणिः, व्याख्या – गोविन्ददैवज्ञः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी